श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ अहीशपुरीशभवस्तवः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ अहीशपुरीशभवस्तवः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

कले! मम कलेवरं कलय ते न लीलापदं
बलेन मम लेखराट् मम मनः परं गाहते।
बिलेशयकुलेशितुर्नगरमञ्जसा गम्यते
सलेपकमले! ततो भव पलायनैकस्पृहः॥ १ ॥

दर्वीकरः प्रणमताममृतं प्रदातुं
उर्वीतले वसति यत्र पतिस्सुराणाम्।
दर्वीकरेन्द्रनगरीति ततः पृथिव्यां
गुर्वी प्रथा समजनीति विभाति युक्तम्॥ २ ॥

यस्मादभूवममृताशननायकस्य
लावण्यवर्षणसुधाम्बुमुचो ललाटात्।
तस्यायमेति समतामिति शूलपाणिः
अर्धामृतांशुमधुना शिरसा बिभर्ति॥ ३ ॥

श्रीमान् वेदवतंसदेशिकमणिः सत्यं मणीनां मणिः
योऽसौ पार्थिवकन्यकाश्रवणयोः नेपथ्यमद्याऽभवत्।
कामं भाति च कुण्डलीन्द्रनगरे भक्त्या धृतिं तन्वतां
कामं कामगणं च पुष्यति ततः कामं निगृह्णाति च॥ ४ ॥

तरङ्गमुखनन्दिनीकनकपद्मिनीकामुके
मुदा गरुडवाहिनीतटवनावनीवासिनि।
रतिं कलय चित्त! मे विबुधनायके साम्प्रतं
सनातनवचश्शिरोगुरुगिरां परो यस्सखा॥ ५ ॥

www.prapatti.com

श्रीमद्देवदवतंसदेशिकमणिं सौन्दर्यसंवर्षिणं
कामं मञ्जुलवंशभूषितकरं कान्तागृहान्तस्स्थितः।
दृष्ट्वा देवपतिर्मनस्यतितरामासाद्य लज्जामसौ
वस्त्रेणावृतविग्रहो निजगृहं यातीति मन्यामहे॥ ६ ॥

व्रीडामित्थमवाप पूर्वदिवसे रात्रौ सुराणां पतिः
नारीरूपमथास्य साम्प्रतमसौ दृष्ट्वा सुवर्णाब्जिनी।
इत्थं तत्र परस्परं प्रहसितुं जातावशक्ताविमौ
तुल्यं रागमवाप्य देशिकमणौ लीलावशात् क्रीडतः॥ ७ ॥

लीलायष्टिगतश्शुको गुरुमणेः हस्तस्थितां तां शुकीम्
इत्थं प्राह किमर्थमत्र वससि त्वं चेति सा तं पुनः।
अध्येतुं स्तवमच्युतस्य मधुरं पुंसां न शक्यं हि तत्
तस्मान्नावतरं त्वया नु कथितं श्रोष्यामि कान्ते! वद॥ ८ ॥

नवनीतकुम्भपरिरम्भशोभनः
नयनोत्सवाय नरवाहनोऽभवत्।
शुकसंयुतो हि चरतीह देशिकः
तदयं हि रम्यवसुदेवनन्दनः॥ ९ ॥

सिंहे स्निह्यति कुञ्जरेऽपि कुतुकी तुङ्गे तुरङ्गे तथा
प्रातर्नित्यमवाप्य कृष्णहरिणालोकं दयावारिधिः।
सिंहोऽयं कविवादिनां विजयते ब्रह्माचलस्यान्तिके
तस्मिन् वर्गचतुष्टयं च सुलभं मन्ये समेषामपि॥ १० ॥

सौन्दर्यैकनिकेतनेन नितरां धाम्नां च धाम्नामुना
श्रीमद्देशिकविग्रहेण भगवान् श्रीमानसावच्युतः।
देवानामपि नायको विजयते तस्मादमुं विग्रहं
विद्यां पुष्टिमथो धनं च भवुकं प्राप्तुं भजामो वयम्॥ ११ ॥

॥ इति अहीशपुरीशभवस्तवः समाप्तः ॥

www.prapatti.com